International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 71-73
© 2026 IJMH
www.themultijournal.com
Received: 02-05-2026
Accepted: 31-05-2026
Publish : 01-06-2026

**डा.सिद्धार्थशङ्करदाशः**
सहायकाचार्यः ,
धर्मशास्त्रविद्याशाखा,
के.सं.वि.वि.श्री सदाशिवपरिसरः, पुरी

**Correspondence:**
**डा.सिद्धार्थशङ्करदाशः**
सहायकाचार्यः ,
धर्मशास्त्रविद्याशाखा,
के.सं.वि.वि.श्री सदाशिवपरिसरः, पुरी

# धर्मशास्त्रे जगत्कारणविमर्शः

**डा.सिद्धार्थशङ्करदाशः**

**सारांशः-**

भारतीयज्ञानपरम्परायां जगतः कारणं किमिति प्रश्नः अत्यन्तमहत्त्वपूर्णः वर्तते। तत्र वैयाकरणाः शब्दब्रह्मणः, ज्यौतिषशास्त्रविदः ब्रह्मणः तथा विष्णोः, मीमांसकाः जगतः अनादित्वस्य,अद्वैतवेदान्तिनः विवर्तवादस्य, रामानन्दवेदान्तिनः श्रीरामपरब्रह्मणः, सांख्यदर्शनम् प्रकृतिपुरुषयोः संयोगस्य, धर्मशास्त्रकाराश्च ईश्वरस्य जगत्कारणत्वं प्रतिपादयन्ति। प्रस्तुतलेखे एतेषां मतानां तुलनापुरःसरं धर्मशास्त्रानुसारेण जगतः कारणत्वं निरूपितम् । अध्ययनात् ज्ञायते यत् भारतीयदर्शनपरम्परायां जगत्कारणविषये बहुविधदृष्टिकोणाः सन्ति, किन्तु सर्वेषां प्रयोजनं जगतः मूलतत्त्वस्य अन्वेषणमेव अस्ति । तथैव साम्प्रतिकवैज्ञानिकारपि सततं जगत् किम् ? किं तस्य कारणमिति भूयभूयोऽन्विष्टमाणाः परिलक्ष्यन्ते ।

**कूटशब्दाः-** जगत्कारणम्, शब्दब्रह्म, प्रकृतिः, पुरुषः, ईश्वरः, वेदान्तः, सांख्यदर्शनम् ।

**प्रस्तावना-**

जगतः उत्पत्तिः, स्थितिः, लयश्च कथं भवन्ति इति विषयः भारतीयदर्शनस्य प्रमुखविचारेषु अन्यतमऽस्ति। उपनिषदः, वेदान्तः, सांख्यदर्शनम्, मीमांसा, व्याकरणदर्शनम्, धर्मशास्त्राणि च अस्मिन् विषये स्वस्वमतानि उपस्थापयन्ति। एतेषां मतानां सम्यगध्ययनं भारतीयदार्शनिकचिन्तनस्य व्यापकतां प्रकाशयति ।

**विषयोपस्थापनम्-**

वैयाकरणानां मते शब्दब्रह्मैव जगतः मूलकारणम्। भर्तृहरिणा उक्तं यथा-

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[1]"

एवं अनादिनिधनत्वे सति अक्षरत्वे सति ब्रह्मत्वं शब्दतत्त्वमिति लक्षणम् ।
तच्च शब्दतत्त्वं ज्ञानरूपमिति तेषां मतम् । तथा चोक्तम्-

"वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ।।"[2]

अत्र शब्दतत्त्वं नित्यं, सर्वव्यापकं, ज्ञानस्वरूपं च मन्यते । जगत् तस्यैव विवर्तरूपेण प्रतीयते ।
ज्योतिषग्रन्थेषु ब्रह्मा, विष्णुः अथवा परमेश्वरः जगतः स्रष्टा इति प्रतिपाद्यते । ग्रहाः, नक्षत्राणि, कालचक्रं च दिव्यनियन्त्रणाधीनानि इति तत्र मतं दृश्यते । तत्र जगतः उत्पत्तिः दैविकव्यवस्थायाः परिणामः इति निश्चियते ।यथोक्तं तत्र
आचार्यभास्करेण स्वकीये सिद्धान्तशिरोमणिग्रन्थे[3]-

"सृष्ट्वा भचक्रं कमलोद्भवेन ग्रहैः सहैतद्भगणादिसंस्थैः ।
सश्वभ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे ॥"

अर्थात् यद् भचक्रं ग्रहैः सह भ्रमद् दृश्यते तद् विश्वसृजा जगदुत्पादकेन कमलोद्भवेन ब्रह्मणा ससर्ज्य ततः शश्वद्भमेऽनवरतभ्रमणे नियुक्तम्।

एवमेव श्रीपतिः स्वकीये सिद्धान्तशेखरग्रन्थे इयं सृष्टिः ब्रह्मणा निर्मिता इति उक्तवान् । यथा-

"ध्रुवद्वयी मध्यगतारकाश्रितं चलद्भचक्रं जलयन्त्रवत् सदा।

विधिः ससर्जाश्विनपौष्णमध्यगैग्रहैः सहोपर्युपरि व्यवस्थितः ।।4"

तथैव सूर्यसिद्धान्तेऽपि सृष्टेः वर्णनं उत्पत्तिक्रमश्च निरूप्यते । यथा-

"अचिन्त्याव्यक्तरुपाय निर्गुणायगुणात्मने ।

समस्तजगदाधार मूर्तये ब्रह्मणे नमः ॥5"

भ्रमात्मकमेव भवति। "भ्रमभिन्नत्वमेव सर्वांशे प्रमात्वम्" इति प्रसिद्धमेव ।

अत्र परंब्रह्मपरमात्मा समस्तजगदाधारमूर्तिरूपेण वर्णितः। एवं भास्करमतेन य एव सृष्टिकर्ता स एव सृष्टिसंहारकः। परन्तु कमलाकरमते तु पूर्वं ब्रह्मनाशस्ततः सृष्टेरिति वैचित्र्यं वर्तते । यद् किमपि भवतु सूर्याद् जगतः उत्पत्तिः इति कमलाकरस्याभिप्रायः ।

किन्तु मीमांसकाः जगतः अनादित्वं स्वीकुर्वन्ति । तेषां मते न कश्चित् आदिकालः अस्ति यदा जगत् नासीदिति । तेषां मते शब्दार्थसम्बन्धोऽपि नित्यः इति ।यथोक्तं श्लोकवार्तिके-

"सर्वेषामनभिज्ञानां पूर्वपूर्वप्रसिद्धितः ।

सिद्धः सम्बन्धः इत्येवं सम्बन्धादिर्न विद्यते ।।6"

किञ्च 'न कदाचिदनीदृशं जगत्' अथवा 'यः कल्पः स कल्पपूर्वः' इति न्यायेन संसारस्य अनादित्वं विचार्यते मीमांसकैः। अतोऽत्र जगत् कस्यचित् ईश्वरस्य सर्जनमिति मतं नाङ्गीकृतम् ।

सांख्यदर्शने प्रकृतिपुरुषयोः संयोगः जगतः कारणम् । प्रकृतिः त्रिगुणात्मिका अविकृतिः , पुरुषः चेतनः किन्तु निष्क्रियः। उभयोः संयोगेन सृष्टेः प्रवर्तनं जायते ।अत्र प्रकृतिः उपादानकारणं, पुरुषः निमित्तकारणं च मन्यते ।

सांख्ये जडचेतनौ जगतः कारणम्। सांख्यानुसारं प्रकृतिर्जडा भूत्वापि क्रियाशीला वर्तते । सत्वरजस्तमांसि गुणैर्युक्ता । किन्तु पुरुषः चेतनो निष्क्रियश्च। अतश्चेतनपुरुषस्य सक्रियप्रकृतेः संयोग एव जगतः कारणं वर्तते। सत्वरजस्तमोगुणसंयोगप्रकृतिर्जगत उपादानकारणं वर्तते । प्रकृतिपुरुषयोः संयोगेन क्षोभाज्जगद् भवति। अत पुरुषो निमित्तकारणम् ।

प्रकृतेः त्रयो गुणा वर्तन्ते सत्त्वम्, रजस्तमश्च।

सत्त्वं सुखात्मकं भवति। रजः दुःखात्मकं भवति। तमो विषादात्मकं भवति। सांख्यकारिकायाम्-

"प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।

अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ।।7"

असतः सत्भावो न विद्यते । सतः कदाप्यभावो न विद्यते। कथ्यते गीतायाम्-

'नासतो विद्यते भावो नाभावो विद्यते सतः ।8'

सत्कार्यवादो भवति यत् कार्यं सदा स्वकारणे विद्यमानं भवति । सांख्यकारिकायां वर्तते-

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ।।9

जगतो मूलकारणं सत्त्वरजस्तमांसि मन्यते। यतोहि गुणा एत एव प्रकृतेः स्वरूपधायकाः पुरुषस्य च स्वार्थसिद्धौ (भोगापवर्गप्राप्तौ) सहायका उपकारणं च भवन्ति।

प्रकृतेः त्रयाणां गुणानां कारणेन सृष्टौ परिवर्तनम्, परिणामो विकारश्चोत्पन्नानि भवन्ति। विकारो द्विविधो भवति- प्रलयकालो सृष्टिकालश्च। प्रलयकाले त्रयो गुणाः साम्यावस्थायां भवन्ति। समानावस्थायामेकगुणोऽपरगुणान्न प्रबलो भवति। त्रिगुणानां साम्यावस्था प्रकृतिः। एष सरूपपरिणामः।

अपरपरिणामो जगद् वर्तते। अस्मिन् एकगुणोऽपरगुणाभ्यां प्रबलो भवति। तदा विषमगुणावस्थायां यत्गतः कार्यमारम्भं भवति। एष विरूपपरिणामो भवति।

सांख्यानुसारेण त्रिगुणानां परिणमनमेव जगत्। तस्यानुसारेण कार्य कदापि नष्टं न भवति। तत्कार्यं स्वकारणे विद्यमानं भवति। जगत्कार्ये गुणानामाविर्भावं प्रलयावस्थायां च पुनर्गुणानां तिरोभावं मूलप्रकृतौ भवति। अतो सकलजगत् प्रकृतेर्गर्भे विद्यमानं भवति। रजोगुणेन प्रकृतिरनवरतं सक्रिया भवति। प्रलयदशायां त्रयो गुणाः साम्यदशायां भवन्ति। जगत्कार्यस्य कृते चेतनपुरुषस्य संयोग आवश्यकः। पुरुषस्य संयोगेन गुणेषु क्षोभो भवति। गुणेषु क्षोभाच्छान्ता प्रकृतिर्विषमा भवति। तस्य प्रकृतौ कम्पनं भवति। त्रयो गुणाः परस्परमभिभूय शान्ताघोरामूढावृत्तिं प्राप्नुवन्ति । ते परस्परमाश्रया भवन्ति। तत्र यथा-

'अन्योन्याभिमवाश्रयजननमिथुनवृत्तयश्च गुणाः ।'

**धर्मशास्त्रे जगत्कारणताविमर्शः-**

धर्मशास्त्रेषु ईश्वर एव जगतः स्रष्टा तथा नियन्ता इति प्रतिपाद्यते। जीवानां कर्मफलभोगार्थं पुनःपुनः अत्र सृष्टिः प्रवर्तते । संसारचक्रं कर्माधीनमित्यत्र मन्यते । अत्र जगतः कारणं किमिति विचारात्प्राक् जगत् किम्? तस्योत्पत्तिः कथं जाता? किमर्थं तस्योत्पत्तिः जाता? जगत् सदसद्वेति विषयाः विचारणीयाः।

कृतकर्मफलभोगार्थमात्मनस्तत्तच्छरीरसम्बन्धः संसारगतिरित्युच्यते धर्मशास्त्रे । अतः कृतकर्मफलभोगार्थमात्मन एवं कारणात् जगत उत्पत्तिः वारं वारं जायते इति वक्तुं शक्यते। तत्र संसारगतिषु ब्रह्मगतेरन्याऽऽद्योत्तमगतिरानन्दरूपा काऽपि नास्ति । तथैव स्थावरात्मिकाया गतेरन्या निकृष्टा दुःखबहुला गतिः काऽपि नास्ति। एवमेताः गतयः शुभाशुभैः कर्मभिर्धर्माधर्माख्यैरेव प्राप्यन्ते। अतः ब्रह्माद्याः स्थावरपर्यन्ताः संसारगतयो धर्माधर्मनिमित्तादेव। अतएवात्र धर्मशास्वस्य अस्ति महती प्रयोजनीयता। एताः ब्रह्माद्याः स्थावरपर्यन्ताः पापपुण्यानां गतयः (उत्पत्तयः) जन्ममरणप्रबन्धे दुःखबाहुल्यादस्मिन् पोरे भूतसंसारेऽनित्यत्वात् सर्वथा नश्वराः भवन्ति । यदुक्तं मनुना10-

"एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः ।

घोरेऽस्मिन् भूतसंसारे नित्यं सततयायिनि ।।" इति

अतः इदं जगदसद् भवति अनित्यत्वात् कारणं यत् नित्यं भवति तदेव सत् भवति । तदपि केवलानन्दरूपं भवति। तद्यथा परंब्रह्मावाप्तिः। सा तु मोक्षलक्षणा भवति। एवं सा कर्मात्मनः शरीरिणः (संसारिणः / क्षेत्रज्ञानां)कर्मसम्बन्धेन शरीरसम्बन्धानुभवाज्ञान-ज्ञानकर्मसमुच्चयात् ब्रह्मज्ञानाद्वा कर्मस्थैर्ये मनसः वृत्तिशून्ये च सति लक्ष्यते।

अतएव ब्रह्म सत् जगत् मिथ्या भवति। परन्तु यावत् पर्यन्तं ज्ञानकर्मसमुच्चयो न भवति तावत् जगदेव सत् भवति। यदा ब्रह्म सदिति वदामः तदा प्रलयावस्था भवति । अर्थात् तत्र केवलं ब्रह्म एव

तिष्ठति। इयं प्रलयावस्था ब्रह्मणः सुसुप्त्यवस्था भवति। कथ्यते यदा स देवो (ब्रह्मा प्रजापतिः) जागर्ति सृष्टिस्थिती इच्छति तदेदं जगत् श्वासप्रश्वासाहारादिचेष्टां लभते। एवं यदा सः स्वपिति नाम निवृत्तेच्छो भवति किम्वा शान्तात्मा उपसंहारमनो वा भवति तदा इदं जगत्प्रलीयते। यदुक्तं तेनैव मनुना-

"यदा स देवो जागर्ति तदेवं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥"[11]

पुनः प्रलयानन्तरं यदा सः ब्रह्म अणुमात्रिको भूत्वा स्थावरेषु चरेषु बीजरूपं समाविशति संयुक्तो भवति तदा स स्थूलदेहान्तरं कर्मानुरूपं धारयति नाम जगदाकारेण स्फुरतीत्यर्थः। अस्मादेव ज्ञायते यत् जगतः कारणं भवति ब्रह्म एव। एवं सः स्वजाग्रत्स्वप्नायाम् इदं सर्वं चराचरं जगत् जीवयति मारयति च। उक्तं यत् मनुना (तत्रैव)

"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ।॥ इति ॥"[12]

किन्तु तत्र सर्गे प्रतिसर्गे वा तस्य इच्छैव बलीयसी भवति। कथं तर्हि सः जगतः सर्जनं कृतवान्नित्युक्तं मनुना-

"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अतएव ससर्जादौ तासु वीर्यमपासृजत् ।।"इति[13]

ईश्वरः नानारूपाः प्रजाः स्रष्टुमिच्छन् आदौ आपो जायन्तामित्य-भिध्यानमात्रेण स्वात् शरीरात् उदकमेवोत्पादितवान्। अत्र टीकाकारः कुल्लूकभट्टः कथयति यत् अभिध्यानपूर्विकां सृष्टिं वदतः मनोः प्रकृतिरेव अचेतना स्वतन्त्रता परिणमत इत्ययं पक्षः न संमतः किन्तु ब्रह्म एव अव्याकृतशक्त्यात्मना जगत्कारणमिति त्रिदण्डिवेदान्तसिद्धान्त एवाभिमतः प्रतिभाति। पुनश्च तस्याभिप्रायेण ब्रह्म एव जगद्रूपतया परिणमते। ततः सः परमात्मा तासु अप्सु स्वशक्तिरूपं वीर्यं न्यषिञ्चत्। ततः तद्वीर्यं परमेश्वरस्येच्छया सहस्रांशुतुल्यं हैममण्डमभवत्। तदनु तस्मिन्नण्डे स्वयं ब्रह्मा संभूतः। अतएव सः हिरण्यगर्भः इति कथ्यते। ततः तस्मिन्त्रण्डे स भगवान् परिवत्सरं स्थित्वा आत्मनः ध्यानात् स्वयमेव तदण्डं द्विधा (भूम्यन्तरिक्षे) अकरोत्। एवमग्रे क्रमेण सम्पूर्णस्य जगतः निर्माणं कृतवान्[14]। अस्मादेव विचारात् ज्ञायते यत् जगतः सर्जनेच्छा परमात्मनः विद्यते, अतः जगतः निमित्तकारणं भवति ईश्वरः ।

एवमेव विष्णुरपि भगवतः विष्णोः जगत्कारणत्वं कथयति। यथोक्तं तेन-

ब्रह्मरात्र्यां व्यतीतायां प्रवृद्धे पद्मसम्भवे।
विष्णु सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलानुगाम् । इत्यादि[15]

तथैव परमात्मा परमेश्वरः जगत्स्रष्टा जगत्कारणं वा भवतीति कथितं हारीतेन। यदुक्तं तेन-

"पुरा देवो जगत्स्रष्टा परमात्मा जलोपरि।
सुरुष्वाप भोगिपर्य्यङ्गे शयने तु श्रिया सह ।।
स चोक्तो देवदेवेन जगत् सृज पुनः पुनः ।
सोऽपि सृष्टवा जगत्सर्वं सदेवासुरमानुषम् ।।" इत्यादिः[16]

किञ्च आत्माऽपि पृथ्व्यादिसाधनैस्तथा श्रोत्रादिभिः इन्द्रियैः युक्तः सन् स्वयं विभिन्नासु योनिषु प्रविश्य शरीररूपम् अवधार्य जगन्निर्माणं करोतीति याज्ञवल्क्येन योगीश्वरेणोक्तम्। उक्तं यथा तेन-

कारणान्येवमादाय तासु तास्विह योनिषु।
सृजत्यात्मानमात्मा च संभूय कारणानि च ॥ इति ।।[17]

एतैः सन्दर्भैः इदं वक्तुं शक्यते यद्धर्मशास्त्रे क्वचिद् ईश्वरः जगतः निमित्तकारणत्वेन क्वचिच्चोपादानकारणत्वेनापि वर्णितः।

**निष्कर्षः-**

भारतीयदर्शनपरम्परायां जगत्कारणविषये विविधाः सिद्धान्ताः दृश्यन्ते । वैयाकरणाः शब्दब्रह्मणः, सांख्याः प्रकृतिपुरुषसंयोगस्य, वेदान्तिनः ईश्वरस्य, मीमांसकाः जगतः अनादित्वस्य च प्रतिपादकाः भवन्ति । एते सर्वे मतभेदाः भारतीयचिन्तनस्य समृद्धिं द्योतयन्ति । यद्यपि कारणतत्त्वस्य व्याख्याने भेदः दृश्यते, तथापि जगतः मूलस्वरूपस्य अन्वेषणं सर्वेषां समानलक्ष्यम् अस्ति ।

**सन्दर्भग्रन्थसूची-**

1) वाक्यपदीयम्- भर्तृहरिः, रघुनाथशर्मा, संपूर्णानन्द सं.वि.वि. वाराणसी ।
2) सिद्धान्तशिरोमणिः -भास्कराचार्यविरचितः, मुरलीधर चतुर्वेदी, संपूर्णानन्द सं.वि.वि.वाराणसी ।
3) श्लोकवार्तिक- स्वामी द्वारिकादास शास्त्री, प्राच्यभारती प्रकाशन, वाराणसी ।
4) सांख्यकारिका -ईश्वरकृष्णः, डा.अनिभा दाश, सांविदी प्रकाशन, पुरी ।
5) मनुस्मृतिः- श्री पं. हरगोविन्दशास्त्री,चौखम्भा संस्कृत भवन, वाराणसी, 2018 ।
6) बृहत्पराशरहोराशास्त्रम्- सीताराम झा, चौखम्बा संस्कृत सीरीज, वाराणसी, 1983 ।
7) याज्ञवल्क्यस्मृतिः -डा.उमेशचन्द्र पाण्डेय,चौखम्बा संस्कृत संस्थान, वाराणसी, 2014 ।

**पाद टिप्पणी -**

1 वाक्यप्रदीय.ब्रह्मकाण्ड.कारिका.1
2 तत्रैव.कारिका.107
3 सि.शि.का.श्लो.13
4 सि.शे.1/1
5 सू.सि.1/1
6 श्लो.वा.संबन्धाक्षेपपरिहार.श्लो.40
7 सां.का.12
8 श्रीमद्भ.2/16
9 सां.का.9
10 मनु.1/50
11 तत्रैव.1/52
12 तत्रैव. 1/57
13 तत्रैव.1.8
14 तत्रैव. 1/9,12-51
15 विष्णु.स्मृ.1.1
16 हारीत.स्मृ.1.9,11
17 या.स्मृ 3/148